E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.325

केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# ईशात्ममननाऽन्वीक्षा पुरुषार्थप्रतानिनी।।

– **दुर्गानाथभारद्वाजः**

शोधच्छात्रः,

लखनऊ विश्वविद्यालयः, लखनऊ

**सारांशिका**– उपनिषदः आत्मतत्त्वसाक्षात्काराद् मोक्षावाप्तिं प्रतिपादयन्ति। तदुपायः श्रवणं श्रुतिवाक्यतः, मननं न्यायशास्त्रानुगुणं निदिध्यासनंच - समाधि प्रज्ञानुगुणं नैरन्तर्य - सत्कारासेवितम्।

कथाङ्गं पदार्थ-यथार्थज्ञानसुलभम् ईशात्मविज्ञानमेव भूयोमननेन निदिध्यासनपरिपाकं भोगापवर्गप्रदमिति निश्चिन्वन्ति आन्वीक्षिकी-विद्याविदः। स्वेतरसकलविद्याप्रकाशिका स्वयम्प्रकाशा चान्वीक्षिकी न्यायसूत्र-भाष्यवार्तिक-तात्पर्य-परिशुद्धिकलेवरा न्याय कुसुमाञ्जलि-आत्मतत्त्व - विवेक-सुषमान्विता मञ्जरी-वृति-संस्कारान्विता नव्यां भव्यामभिनवां भूमिमवतरितुं श्रीमद्गङ्गेशोपाध्याय- रघुनाथ-मथुरानाथ-जगदीश-गदाधरादि विद्वद् - धौरेय-समर्चिता यथा विभाति तथोदाहरणोदाहारविधिं पुरस्कृत्य कार्यकारण-भावोपदर्शनपुरःसरम् अत्र सोपपत्ति पुरुषार्थलम्भनी पुण्या विद्याऽन्वीक्षेति निपुणमुपपादिता।

**कूटशब्दाः**- आत्मदर्शनम्, श्रवणम्, मननम्, निदिध्यासनम्, अतिमृत्युः, पन्थाः, अयनम्, शोकतरणम्, हृदयग्रन्थिः, संशयच्छेदः, कर्मक्षयः, तत्त्वज्ञानम्, अन्वीक्षा, निः श्रेसम्, शास्त्रम्, अनुबन्धचतुष्टयम्, अक्षपादः, संसारमहीरुहबीजम्, मिथ्याज्ञानम्, मोहः, रागः, द्वेषः, जन्म, दुःखम्, प्रवृत्तिः, दोषः, आवर्तः, प्रमाणम्, प्रमेयम्, अपायः, प्रेत्यभावः, विभुपरिमाणम्, पिप्पलम्, करुणा, साम्मुख्यम्, साकाङ्क्षपदार्थः, जन्यता-जनकता, निरूपकम्, निरूपितम्, भावपदार्थः, अभावपदार्थः, परिष्कारः, पुरुषार्थः।।

‘**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**’ इति[1] ‘**तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**’ इति[2] ‘**तरति शोकमात्म विद्**’ इति[3]

‘**भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।**

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।’ इति[4] च श्रुतेः शास्त्रेषु आचार्येषु च श्रद्धाविश्वासादरभाजः साधकाः जीवाः आत्मतत्त्वज्ञानेन अतिमृत्युम् प्राप्नुवन्ति शोकसन्तप्तसंसारसागरं तरन्ति। अनात्मनि आत्मत्वबुद्धिम् अथच आत्मनि अनात्मत्वबुद्धिं परित्यजन्ति। तदिदम् आत्मतत्त्वज्ञानम् श्रुतिवाक्येभ्यः आत्मतत्त्वविषयकं महिमानं शृण्वतः अनुमान-प्रमाणेन युक्ति-समुपेतं मननं विहितवतः साधकस्य निदिध्यासन-समाधितः समुपजायते। अन्वीक्षां न्यायचर्चाम् मननात्मिकां न्यायाचार्याः श्रीमदुदयनाचार्याः भगवतः शिवस्य उपासनां वदन्ति। श्रवणानन्तरम् विधीयमानम् मननमेव भगवदुपासनं, आत्मतत्त्वज्ञानम् प्रसूते। तदिदं दीर्घकालनैरन्तर्यसत्कारासेवितम् आत्मतत्त्वज्ञानं साधकस्य जीवस्य कृते निःश्रेयसाय कल्पते। यथोक्तम्– ‘प्रमाणप्रमेय-संशयप्रयोजन................निग्रहस्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगमः।’ इति[5] ‘दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायादपवर्गः।’ इति[6]

‘**न्यायचर्चेयमीशस्य मननव्यपदेशभाक्।**

**उपासनैव क्रियते श्रवणानन्तरागता।।**इति च।।[7]

तत्त्वज्ञानाद् निःश्रेयसाधिगमः इति प्रथमसूत्रस्य वाक्यांशः। तत्र तत्त्वज्ञानम् इति समस्त-पदस्य व्युत्पत्तिःका? इति जिज्ञासायां समाधानम् जागर्ति- ‘तत्त्वं ज्ञायते अनेन’ इति व्युत्पत्त्या तत्त्वज्ञानं नाम शास्त्रम्। शास्त्रेण · न्यायशास्त्रेण प्रमाणप्रमेयादि- षोडशपदार्थाः प्रतिपाद्यन्ते। ततश्च न्यायशास्त्रं प्रतिपादकं चेद् प्रमाण-प्रमेयादि-पदार्थतत्त्वं प्रतिपाद्यं भवति। एकतः शास्त्रस्य

---

1 बृहदार0-5/7

2 श्वेताश्व0- 3/8

3 उपिषद्- वचनम्।

4 मुण्डकोपनिषद्वचनम् 2/2/8

5 न्यायसूत्रम् 1/1/1

6 न्यायसूत्रम् 1/1/2

7 न्यायकुसुमाञ्जलिः

प्रमाणादिपदार्थतत्त्वेन सह ज्ञाप्यज्ञापकभाव: सम्बन्ध: अपरत: प्रमाणादि- पदार्थतत्त्वज्ञानं कारणं, नि:श्रेयसम् कार्यम् इति एतयोर्मध्ये कार्यकारणभावात्मा सम्बन्धो भवति। पदार्थतत्त्वज्ञानं प्रयोजनं तद्वत् नि:श्रेयसमपि प्रयोजनं सूचितं भवति। पदार्थ-तत्त्वजिज्ञासु: नि:श्रेयसप्रेप्सुश्चात्राधिकारी सूचितो भवति। तदेवम् प्रथमसूत्रेण ग्रन्थादौ विषय: सम्बन्ध: अधिकारी प्रयोजनं चेति अनुबन्धचतुष्टयमावेदितं भवतीति नि:श्रेयसावाप्ति-मङ्गलावेदकं सूत्रमिदं जयति।

तस्यैतस्य मननोपास्तिमय - न्यायविस्तर - शास्त्रस्य प्रणेतृ प्रवर्तक: गौतमो महर्षि: न्यायसूत्र-वृत्तिकृता निभृतं स्तूयते-

यदीयतर्ककिरणैरान्तरध्वान्तसन्ततिम्।

सन्तस्तरन्ति भास्वन्तम् अक्षपादं नमामि तम्।।इति[8]

न्यायशास्त्रानुशीलनेन सुस्पष्टं विदितं भवति-

1. संसारवृक्ष: दु:खमय:
2. मिथ्याज्ञानस्वरूप-बीजात् संसारवृक्ष: समुदेति।
3. मिथ्याज्ञानं नाम अनात्मनि शरीरेन्द्रियादौ आत्मत्वबुद्धि: ।
4. तद् - वशाद् जीवस्य शरीरेन्द्रियादीनाम् अनुकूलेषु स्त्रीपुत्र-स्रक्चन्दनधनादिषु अनुकूलत्व-रमणीयत्वप्रकारको भ्रमात्मा मोह: समुदितो भवति।
5. तद्वत् शरीरेन्द्रियादीनां प्रतिकूलेषु सर्पदंशादिषु प्रतिकूलत्वप्रकारक: भ्रमात्मा मोह: संजायते।
6. मोहवशात् स्त्रीपुत्रधनस्रक्चन्दनादिषु रागो जायते।
7. सर्प-दंशादिषु द्वेष: उदेति।
8. स्रक्चन्दनादीनाम् अप्राप्त्या तत्कारणेषु द्वेषो जायते।
9. स्रक्चन्दनादय: संरक्षणीया:, तद्वद् सर्पदंशादय: निवारणीया इति मोहो जायते।
10. रागद्वेषमोहानाम् परस्परम् अनुषक्तता भवति।
11. दृश्यते हि मूढो रज्यति, रक्तो मुह्यति, मूढ: कुप्यति, कुपितो मुह्यति ।
12. रागादिभि: प्रेरितो जन: सुकृताचरणात् पुण्यम्, दुष्कृताचरणात् पापं विन्दति।
13. पुण्यवशात् प्रशस्तजन्मलाभ:।

---

[8] न्यायसूत्रवृत्तिमङ्गलपद्यम्।

14. पापवशात् तु निन्दितजन्मलाभः।

15. आद्यः शरीरप्राणसम्बन्धः जन्मपदार्थः।

16. जाते शरीरसम्बन्धे दुःखं भुङ्क्ते जनः।

17. दुःखकारणं प्रवृत्तिः।

18. प्रवृत्तिकारणं दोषः।

19. दोषस्य उद्भवे मिथ्याज्ञानं मूलम्।

20. मिथ्याज्ञानम्, दोषः, प्रवृत्तिः, जन्म, दुःखं चेति पञ्चकं संसारः।

21. सोऽयं संसारः आवर्ताद् आवर्तान्तरम् इव आवर्तते।

22. तदेवं संसारबन्धोपनिपातः मिथ्याज्ञानोपनतस्य जीवस्य निर्बाधः प्रचलति।

यस्य यद्विषयक यथार्थज्ञानं, परमं प्रयोजनं लम्भयति तत् प्रमेयमिति प्रोच्यते। प्रमेयं चैतत् द्विविधं भवति। 1. मुख्यम् 2. गौणं चेति।

1. परमं प्रयोजनम् अपवर्गः।

2. प्रमेयं द्वादशविधं भवति।

1. आत्मा 2. शरीरम् 3. इन्द्रियम् 4. अर्थः 5. बुद्धिः, 6. मनः 7. प्रवृत्तिः 8. दोषः 9. प्रेत्यभावः 10. फलम् 11. दुःखम् 12. अपवर्गः ।

3. आत्मनः यथार्थज्ञानं निवर्तयति– मिथ्याज्ञानम्।

4. मिथ्याज्ञानापाये दोषापायो भवति।

5. दोषापाये प्रवृत्तेः अपायो भवति।

6. प्रवृत्तेः अपाये जन्मनः अपायो भवति।

7. जन्मनः अपाये दुःखस्यापायाद् अपवर्गः प्राप्यते।

8. परमपुरुषार्थः अपवर्गः परमं प्रयोजनम् शरीरधारिणः।

9. प्रमेयस्य आत्मनः यथार्थज्ञानेनैव मिथ्याज्ञानादीनां क्रमेण निवृत्तौ अपवर्ग- प्राप्तिः भवति। अतः आत्मा मुख्यः प्रमेयः।

10. शरीरस्य, इन्द्रियस्य, अर्थस्य, बुद्धेः, मनसः, प्रवृत्तेः, दोषस्य, प्रेत्यभावस्य, फलस्य चेति नवानां ज्ञानम् आत्मयाथार्थ्यज्ञानजनन-द्वारा अपवर्ग प्रयोजकं भवति न तु साक्षात्कारणम्।

11. सुखदुःखभोक्ता आत्मा।

12. जीवात्मनः भोगायतनं शरीरम्।
13. भोगस्य असाधारणं कारणम् इन्द्रियम्।
14. भोग्याः अर्थाः।
15. भोगः साक्षात्कारात्मा बुद्धिः।
16. भोगस्य साधारणकारणम् अन्तःकरणं मनः।
17. भोगादृष्टकारणं प्रवृत्तिः।
18. भोगबीजं कर्म, तस्योपघातकाः दोषाः।
19. संचितभोगबीजस्य आत्मनः पूर्वशरीरत्यागपुरःसरं शरीरान्तर-परिग्रहः प्रेत्यभावः।
20. भोगबीजानां चरमपरिणामः फलम्।
21. दुःखविषयकं यथार्थज्ञानम् दुःखस्यात्यन्तिकनिवृत्ति-स्वरूपापवर्गज्ञाने प्रतियोगिज्ञानविधया कारणं भवति।
22. अपवर्गस्य ज्ञानम् - अपवर्ग-फल प्राप्तौ फलज्ञानविधया परम्परया कारणम् भवति।
23. तदेवं मुख्यं प्रमेयम्-आत्मैव न तु शरीरादिकम्।
24. आत्मप्रभृति अपवर्गपर्यन्तं द्वादशप्रमेयाणां द्वेधा विभागः–
25. 1. उपादेयः- आत्मा अपवर्गश्च।
    2. हेयम् - शरीरादिकं दुःखान्तदशकम्।
26. इच्छाश्रयः आत्मा न प्रत्यक्षगोचरः।
27. इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि किञ्चिदाश्रितानि कार्यत्वाद् रूपवत्-इत्यनुमानेन आत्मनः सिद्धिः भवति।
28. इच्छादयः शरीराद्यतिरिक्तद्रव्याश्रिताः शरीराद्यनाश्रितत्वे सति किञ्चिद् - द्रव्याश्रितत्वाद् यन्नैवं तन्नैवं यथा रूपम्।
29. अयमात्मा अविनाशी अनादित्वे सति भावत्वाद् आकाशवत्।
30. नित्ये आत्मनि शरीरसंयोगवियोगाभ्यां जन्ममरणव्यवहारः।
31. नित्यत्वात् प्रत्यक्षगुणाश्रयत्वाच्च आत्मा विभुः आकाशवत्।
32. विभुपरिमाणे आत्मनि मनसः गमनागमनाभ्यां परलोकेहलोक-व्यवहारः।
33. शरीरात् शरीरान्तरं संसरन्तः कर्मफलभोक्तारः जीवास्त्वनन्ता एव प्रतिशरीरं भिन्नाः।
34. जीवानां कर्मफलदाता परमात्मा त्वेक एव।
35. संसारी जीवः, असंसारी ईश्वरश्चेति अनुमानगम्यौ।
36. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।

तयोरन्य: पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।।[9]

37. रागादिदोषरहित: स्वजनानुरागी ईश्वर:।
38. ईश्वर: शरीररहित: 'अपाणिपाद इत्यादिश्रुते:।[10]
39. परमेश्वर: पञ्चकृत्यानि कुरुते- 1. सृष्टि: 2. स्थिति: 3. संहार: 4. निग्रह: (तिरोधानम्) 5. अनुग्रह:-इति।
40. सृष्टौ शुभाशुभकर्मणो: हेतुता भवति। पञ्चस्वपि कृत्येषु भगवत: करुणा जीवं प्रति निरन्तरं प्रवर्तते।
41. सृष्टौ सत्यां स्थितिकाले सदा प्रयत्नशीला: प्राणिन: खिद्यमाना: भवन्ति। करुणया तान् विश्रामं प्रदातुम् संहारकृत्ये प्रवर्तते भगवान्।
42. तिरोधानेन जीवकर्तृकां स्तुतिम् उपासनां च लभमान: प्रीत: शिव: अनुग्रहम् आतनुते। विदित: साक्षात्कृतश्च शिव: योगसमाधिमत: साधकस्य मिथ्याज्ञानाद्यपनोदनेन दु:खानाम् आत्यन्तिकं विमोक्षणं नाम अपवर्गम्[11] परमम्पुरुषार्थम् लम्भयतीति तदीयां स्मृतिमेव सततं कामये नतु विस्मृतिम्। यथोक्तम्–

**त्वय्येव भात: स्मृतिविस्मृती ते द्वयोरपि त्वं स्वयमेव भासि।**
**तथापि साम्मुख्यसुखप्रदाऽसौ स्मृति: प्रिया मे नहि विस्मृतिस्ते।।**इति[12]

तमिमम् प्राचीनन्यायप्रतिपाद्यविशेषम् अनुमानानुमेयपदार्थं शब्द-शाब्द पदार्थं च पार्यन्तिकसौक्ष्म्येण नव्य-न्यायसंज्ञया तथा प्रतिपादितं यथा व्याकरणादिशास्त्रान्तरमपि समाकृष्टमभूत्। तदेव सम्प्रति किञ्चिदिव विचार्यते। न लोकाद् भिद्यते शास्त्रम् - इति सूक्त्या लोकरीतिमनुसृत्य न्यायवैशेषिक-दर्शनयो: साकाङ्क्ष-पदार्थयो: परस्परं निरूप्यनिरूपक-भावापन्नता स्वीक्रियते। राम: पुत्र आसीत् - इति वाक्ये श्रुते (उच्चारिते) आकाङ्क्षा भवति- राम: कस्य पुत्र: आसीत्? तदा उच्यते राम: दशरथस्य पुत्र: आसीत्। तदा आकाङ्क्षा शान्ता भवति। अथ च निराकाङ्क्ष-प्रतिपत्ति: भवति। तद्वत् दशरथ: पिता आसीत्- इति वाक्ये श्रुतेऽपि आकाङ्क्षा उदेति कस्य पिता? रामस्य-इत्युक्तौ निराकाङ्क्षप्रतिपत्ति: जायते।

---

9 श्वेताश्व0- 4/6

10 श्वेताश्वतरोपनिषद 3/9

11 तदत्यन्तविमोक्षोऽपवर्ग:-न्या0सू01/1/22

12 श्रीपूर्णताप्रत्यभिज्ञा प्रक्रियाविमर्शनम्।

**तदत्र निष्कर्ष:**–1. रामनिष्ठा पुत्रता केन निरूपिता भवति? दशरथनिष्ठजनकता-शक्त्या।

2. दशरथनिष्ठा जनकता केन निरूपिता भवति? रामनिष्ठजन्यता- (पुत्रता) शक्त्या।

**अत्र इदमपि अवधेयम् भवति** निरूपिता एका शक्ति: भवति निरूपकस्तु 1. शक्ति: 2. शक्तेराश्रयश्च भवति।

1. रामनिष्ठजन्यताया: निरूपिका दशरथनिष्ठजनकताभवति अथच रामनिष्ठजन्यताया: निरूपक: जनकताश्रय: दशरथो भवति।

2. (क) दशरथनिष्ठ जनकताया: निरूपिका रामनिष्ठजन्यता भवति अथच

(ख) दशरथनिष्ठजनकताया: निरूपक: जन्यताश्रय: राम: भवति।

तद्वत् द्रव्ये गुण: समवायेन सम्बन्धेन आश्रित: तिष्ठति। अत्रापि द्रव्यनिष्ठा अधिकरणता निरूपिता भवति। अथच अधिकरणताया: निरूपिका भवति 1. गुणनिष्ठा आधेयता 2. आधेयताश्रय: गुण: (निरूपक:)। अत्र नियम: प्रवर्तते- यन्निरूपितं यद् भवति तदाश्रयनिरूपितमपि तद्भवति। रामनिष्ठजन्यता, निरूपिता अथ च जन्यताश्रयरामनिरूपिता दशरथनिष्ठजनकतानिरूपितमपि तद्भवति। रामनिष्ठजन्यता, दशरथनिष्ठजनकता-निरूपिता भवति अथच दशरथनिरूपिता भवति। अत: निरूपकद्वयम्- 1. दशरथनिष्ठजनकता

2. जनकताश्रय: दशरथ:।

द्रव्यपदार्थे गुण:, कर्म, द्रव्यत्वं जाति: तिष्ठति।

(1) द्रव्ये 1. द्रव्यत्वं (धर्म:) 2. अधिकरणता (शक्ति:) एतद् द्वयं तिष्ठति। अत: द्रव्यनिष्ठा अधिकरणता द्रव्यत्व-धर्मावच्छिन्ना भवति। अर्थात् अधिकरणता अवच्छिन्नाभवति, द्रव्यत्वम् अवच्छेदकं भवति।

(2) गुणे 1. गुणत्वं (धर्म:) 2. आधेयता (शक्ति:) एतद्द्वयं तिष्ठति। अत: गुणनिष्ठ- आदेयता गुणत्व-धर्मावच्छिन्ना भवति।

अर्थात् आधेयता अवच्छिन्ना भवति, गुणत्वम् अवच्छेदकं भवति।

तदेवं **द्रव्ये गुण: तिष्ठति** - इतिवाक्यस्य न्यायपरिष्कारगर्भ: अर्थ:—

1. द्रव्यनिष्ठा अधिकरणता- निरूपिता गुणनिष्ठा आधेयता।

2. द्रव्यनिष्ठा-द्रव्यत्वावच्छिन्नाधिकरणता- निरूपिता, गुणनिष्ठा गुणत्वावच्छिन्ना आधेयता भवति।

3. द्रव्यत्वावच्छिन्ना-द्रव्यनिष्ठाधिकरणता-निरूपिता गुणत्व-धर्मावच्छिन्ना समवाय-

सम्बन्धावच्छिन्ना गुणनिष्ठा-आधेयता

4. समवाय–सम्बन्धावच्छिन्न - गुणत्वावच्छिन्न - गुणनिष्ठा-आधेयतानिरूपिका द्रव्यत्वावच्छिन्ना द्रव्यनिष्ठा अधिकरणता।

5. समवायसम्बन्धावच्छिन्न - गुणत्वावच्छिन्न - गुणनिष्ठाधेयतानिरूपक: द्रव्यत्वावच्छिन्ना द्रव्यनिष्ठाधिकरणताश्रय: द्रव्यम्।

उपर्युक्त: न्यायपरिष्कारलभ्य: अर्थ: चित्रमहिम्ना सम्प्रति स्फुटी-क्रियते। तद्यथा–

चित्र सं0-1

गुणत्वम् = धर्म: ↑ (निरूप्यता) ↑

1. गुण: → आधेयता (शक्ति:) · गुणनिष्ठागुणत्वावच्छिन्नाआधेयता

द्रव्यत्वम् ↖ ↑ (निरुपकता) ↑

द्रव्यम् → अधिकरणता (शक्ति:) · द्रव्यनिष्ठा द्रव्यत्वावच्छिन्ना अधिकरणता

चित्र सं0 - 2

कर्मत्वम् (धर्म:) ↑ (निरूप्यता) ↑

2. कर्म (क्रिया) - आधेयता (शक्ति:) · क्रियानिष्ठा क्रियात्वावच्छिन्नाआधेयता

द्रव्यत्वम् ↖ ↑

द्रव्यम् → अधिकरणता (शक्ति:) द्रव्यनिष्ठा द्रव्यत्वावच्छिन्ना अधिकरणता

चित्र सं0-3

सत्तात्वम् (धर्म:) ↑ (निरूप्यता) ↑

3. सामान्यम् = सत्ता - आधेयता - सत्ता (सामान्य) निष्ठा सत्तात्वावच्छिन्ना निरुप्यता आधेयता

द्रव्यत्वम् ↖ ↑

द्रव्यम् → अधिकरणता (शक्ति:) (निरूप्यता) ↑

द्रव्यत्वनिष्ठा द्रव्यत्वावच्छिन्ना अधिकरणता इति

न्याय-नव्यन्यायतया समेधमाना अन्वीक्षा वस्तुत: सूक्ष्मतया तत्त्वावबोधने सर्वशास्त्रप्रकाशिका, सर्वकर्मणाम् उपायभूता, आश्रयभूता सर्वधर्माणाम्, भोगमोक्षदा

जयतीतिशम्।।

## सन्दर्भ:–

1. बृहदार$_0$ - 5/7
2. श्वेताश्व$_0$ - 3/8
3. उपिषद्-वचनम्।
4. उपिनषद्वचनम्
5. न्यायसूत्रम् 1/1/1
6. न्यायसूत्रम् 1/1/2
7. न्यायकुसुमाञ्जलि:
8. न्यायसूत्रवृत्तिमङ्गलपद्यम्।
9. श्वेताश्व$_0$- 4/6
10. श्वेताश्व$_0$3/9
11. न्यायसूत्रम् 1/1/22
12. श्रीपूर्णताप्रत्यभिज्ञा प्रक्रियाविमर्शनम्।

## सहायकग्रंथसूची:


1. बृहदारण्यकोपनिषद्। संस्कृत मूल। चौखम्बा संस्कृत श्रृंखला कार्यालय, वाराणसी।
2. अक्षपाद गौतम। न्यायसूत्रम्। दर्शन ग्रंथमाला नं. १०। चौखम्बा संस्कृत संस्थान, वाराणसी।
3. माधव। अक्षपाददर्शनम् सर्वदर्शनसङ्ग्रहः। दर्शन ग्रंथमाला नं. ४२। चौखम्बा संस्कृत संस्थान, वाराणसी।
4. अन्नम्भट्ट। न्यायकुसुमाञ्जलिः। दर्शन ग्रंथमाला नं. २८। चौखम्बा संस्कृत संस्थान, वाराणसी।
5. श्वेताश्वतरोपनिषद्। वेदान्त ग्रंथमाला नं. १५। चौखम्बा वेदान्त प्रकाशन, वाराणसी।
6. Ranade, R.D. - A Constructive Survey of Upnishdic Philosophy, Oriental

Book Agency, Poona, 1926

7. Deussen, Paul - The Philosophy of Upnishads, (Tr.) A.S. Geden, T&T Clark, Edinburg, 1908
8. Dasgupta, S.N. - A History of Indian Philosophy, Cambridge University Press, London, 1963
9. The Nyayasutras। Gautam। Vatsyayana भाष्य सहित। Nayayavarttika एवं Tatparyatika अंश। संपादक: Gangadhar Sastri Tailanga। E.J. Lazarus Co., बनारस। १८९६। विज्ञानग्राम संस्कृत श्रृंखला खंड ९।
10. The Kusumanjali। Udayana Acharya। Haridas Bhattacharya टीका सहित। संपादक एवं अनुवादक: E.B. Cowell। Baptist Mission Press, कलकत्ता। १८६४।